# Atharvashikha Upanishad

# અથર્વશિખોપનિષત્

## Document Information

Text title : Atharvashikha Upanishad

File name : atharvashikha.itx

Category : upanishhat, svara, shiva

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 23/108; Atharva Veda, Shaiva Upanishad

Latest update : October 14, 1999, March 17, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# અથર્વશિખોપનિષત્

ઓઙ્કારાર્થતયા ભાતં તુર્યોઙ્કારાગ્રભાસુરમ્ ।
તુર્યતુર્યત્રિપાદ્રામં સ્વમાત્રં કલયેઽન્વહમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ અથ હૈનં પૈપ્પલાદોઽઙ્ગિરાઃ સનત્કુમારશ્ચાથર્વણમુવાચ
ભગવન્કિમાદૌ પ્રયુક્તં ધ્યાનં ધ્યાયિતવ્યં કિં તદ્ધ્યાનં કો
વા ધ્યાતા કશ્ચ ધ્યેયઃ ।

સ એભ્યોથર્વા પ્રત્યુવાચ ।
ઓમિત્યેતદક્ષરમાદૌ પ્રયુક્તં ધ્યાનં ધ્યાયિતવ્યમિત્યેતદક્ષરં
પરં બ્રહ્માસ્ય પાદાશ્ચત્વારો વેદાશ્ચતુષ્પાદિદમક્ષરં પરં બ્રહ્મ ।
પૂર્વાસ્ય માત્રા પૃથિવ્યકારઃ ઋગ્ભિરૃગ્વેદો બ્રહ્મા વસવો ગાયત્રી ગાર્હપત્યઃ ।
દ્વિતીયાન્તરિક્ષં સ ઉકારઃ સ યજુભિર્યજુર્વેદો વિષ્ણુરુદ્રાસ્ત્રિષ્ટુબ્દક્ષિણાગ્નિઃ ।
તૃતીયઃ દ્યૌઃ સ મકારઃ સ સામભિઃ સામવેદો રુદ્રા આદિત્યા જગત્યાહવનીયઃ ।
યાવસાનેઽસ્ય ચતુર્થ્યર્ધમાત્રા સા સોમલોક ઓઙ્કારઃ
સાથર્વણમન્ત્રૈરથર્વવેદઃ સંવર્તકોઽગ્નિર્મરુતો
વિરાડેકર્ષિર્ભાસ્વતી સ્મૃતા ।
પ્રથમા રક્તપીતા મહદ્બ્રહ્મ દૈવત્યા ।
દ્વિતીયા વિદ્યુમતી કૃષ્ણા વિષ્ણુદૈવત્યા ।
તૃતીયા શુભાશુભા શુક્લા રુદ્રદૈવત્યા ।
યાવાસાનેઽસ્ય ચતુર્થ્યર્ધમાત્રા સા વિદ્યુમતી સર્વવર્ણા પુરુષદૈવત્યા ।
સ એષ હ્યોઙ્કારશ્ચતુરક્ષરશ્ચતુષ્પાદશ્ચતુઃશિરશ્ચતુર્થમાત્રઃ

સ્થૂલમેતદ્હ્રસ્વદીર્ઘપ્લુત ઇતિ ॥

ૐ ૐ ૐ ઇતિ ત્રિરુક્ત્વા ચતુર્થઃ શાન્ત આત્માપ્લુતપ્રણવપ્રયોગેણ
સમસ્તમોમિતિ પ્રયુક્ત આત્મજ્યોતિઃ સકૃદાવર્તતે સકૃદુચ્ચારિતમાત્રઃ
સ એષ ઊર્ધ્વમુન્નમયતીત્યોઙ્કારઃ ।
પ્રાણાન્સર્વાન્પ્રલીયત ઇતિ પ્રલયઃ ।
પ્રાણાન્સર્વાન્પરમાત્મનિ પ્રણામયતીત્યેતસ્માત્પ્રણવઃ ।
ચતુર્ધાવસ્થિત ઇતિ સર્વદેવવેદયોનિઃ સર્વવાચ્યવસ્તુ પ્રણવાત્મકમ્ ॥ ૧॥

દેવાશ્ચેતિ સંધત્તાં સર્વેભ્યો દુઃખભયેભ્યઃ સંતારયતીતિ
તારણાત્તારઃ । સર્વે દેવાઃ સંવિશન્તીતિ વિષ્ણુઃ । સર્વાણિ
બૃહયતીતિ બ્રહ્મા । સર્વેભ્યોઽન્તસ્થાનેભ્યો ધ્યેયેભ્યઃ
પ્રદીપવત્પ્રકાશયતીતિ પ્રકાશઃ । પ્રકાશેભ્યઃ સદોમિત્યન્તઃ શરીરે
વિદ્યુદ્વદ્દ્યોતયતિ મુહુર્મુહુરિતિ વિદ્યુદ્વત્પ્રતીયાદ્દિશં દિશં ભિત્ત્વા
સર્વાંલ્લોકાન્વ્યાપ્નોતિ વ્યાપયતીતિ વ્યાપનાદ્વ્યાપી મહાદેવઃ ॥ ૨॥

પૂર્વાસ્ય માત્રા જાગર્તિ જાગરિતં દ્વિતીયા સ્વપ્નં તૃતીયા
સુષુપ્તિશ્ચતુર્થી તુરીયં માત્રા માત્રાઃ પ્રતિમાત્રાગતાઃ
સમ્યક્સમસ્તાનપિ પાદાઞ્જયતીતિ સ્વયંપ્રકાશઃ સ્વયં બ્રહ્મ
ભવતીત્યેષ સિદ્ધિકર એતસ્માદ્ધ્યાનાદૌ પ્રયુજ્યતે । સર્વ
કરણોપસંહારત્વાદ્ધાર્યધારણાદ્બ્રહ્મ તુરીયમ્ । સર્વકરણાનિ
મનસિ સમ્પ્રતિષ્ઠાપ્ય ધ્યાનં વિષ્ણુઃ પ્રાણં મનસિ સહ કરણૈઃ
સમ્પ્રતિષ્ઠાપ્ય ધ્યાતા રુદ્રઃ પ્રાણં મનસિ સહકરણૈર્નાદાન્તે
પરમાત્મનિ સમ્પ્રતિષ્ઠાપ્ય ધ્યાયીતેશાનં પ્રધ્યાયિતવ્યં સર્વમિદં
બ્રહ્મવિષ્ણુરુદ્રેન્દ્રાસ્તે સમ્પ્રસૂયન્તે સર્વાણિ ચેન્દ્રિયાણિ સહ ભૂતૈર્ન
કારણં કારણાનાં ધ્યાતા કારણં તુ ધ્યેયઃ સર્વૈશ્વર્યસમ્પન્નઃ
શંભુરાકાશમધ્યે ધ્રુવં સ્તબ્ધ્વાધિકં ક્ષણમેકં ક્રતુશતસ્યાપિ
ચતુઃસપ્તત્યા યત્ફલં તદવાપ્નોતિ કૃત્સ્નમોઙ્કારગતિં ચ
સર્વધ્યાનયોગજ્ઞાનાનાં યત્ફલમોઙ્કારો વેદ પર ઈશો વા શિવ એકો
ધ્યેયઃ શિવંકરઃ સર્વમન્યત્પરિત્યજ્ય સમસ્તાથર્વશિખૈતામધીત્ય
દ્વિજો ગર્ભવાસાદ્વિમુક્તો વિમુચ્યત એતામધીત્ય દ્વિજો ગર્ભવાસાદ્વિમુક્તો
વિમુચ્યત ઇત્યો ँ સત્યમિત્યુપનિષત્ ॥ ૩॥

ૐ ભદ્રં કર્ણેભિરિતિ શાન્તિઃ ॥

॥ ઇતિ અથર્વવેદીય અથર્વશિખોપનિષત્સમાપ્તા ॥

*Atharvashikha Upanishad*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*